।। শ্রী নৃসিংহকৃপাবলোকনপ্রার্থনাস্তুতিঃ ।।

শ্রী কৃষ্ণ উবাচ -

সুলভো ভক্তিয়ুক্তানাং দুর্দর্শো দুষ্টচেতসাম ।
অনন্য়গতিকানাং চ প্রভুঃ ভক্তৈকবত্সলঃ ।। ১ ।।

শনৈশ্চরস্তত্র নৃসিংহদেবস্তুতিং চকারামলচিত্তবৃত্তিঃ ।
প্রণম্য় সাষ্টাংগমশেষলোককিরীটনীরাজিতপাদপদ্মম ।। ২ ।।

শনিরুবাচ -

য়ত্পাদপংকজরজঃ পরমাদরেণ
সংসেবিতং সকলকল্মষরাশিনাশম ।
কল্য়াণকারণমশেষনিজানুগানাং
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৩ ।।

সর্বত্র চংচলতয়া স্থিতয়া চ লক্ষ্ম্য়া
ব্রহ্মাদিবংদ্য়পদয়া স্থিরয়া ন্য়সেবি ।
পাদারবিংদয়ুগলম পরমাদরেণ
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৪ ।।

য়দ্রূপমাগমশিরঃপ্রতিপাদ্য়মাদ্য়-
মাধ্য়াত্মিকাদিপরিতাপহরং বিচিংত্য়ম ।
য়োগীশ্বরৈরপগতাখিলদোষসংঘৈঃ

স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৫ ।।

প্রহ্লাদভক্তবচসা হরিরাবিরাসীঃ
স্তংভে হিরণ্যকশিপুং য় উদারভাবঃ ।
ঊর্বোর্নিধায় তদুরে নখরৈর্দদার
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৬ ।।

য়ো নৈজভক্তমনলাংবুধিভূধরোগ্র-
শৃংগপ্রপাতবিষদংতিসরীসৃপেভ্য়ঃ ।
সর্বাত্মকঃ পরমকারুণিকো ররক্ষ
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৭ ।।

য়ন্নির্বিকারপররূপবিচিংতনেন
য়োগীশ্বরা বিষয়বীতসমস্তরাগাঃ ।
বিশ্রাংতিমাপুরবিনাশবতীং পরাখ্য়াং
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৮ ।।

য়দ্রূপমুগ্রমরিমর্দনভাবশালি-
সংচিংতনেন সকলাহবভীতিহারি ।
ভূতজ্বরগ্রহসমুদ্ভবভীতিনাশং
স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ৯ ।।

য়স্য়োত্তমং য়শ উমাপতিপদ্মজন্ম-
শক্রাদিদৈবতসভাসু সমস্তগীতম ।
শ্রুত্য়ৈব সর্বশমলপ্রশমৈকদক্ষং

www.yousigma.com

স ত্বং নৃসিংহ ময়ি ধেহি কৃপাবলোকম ।। ১০ ।।

শ্রী কৃষ্ণ উবাচ -

এবং শ্রুত্বা স্তুতিং দেবঃ শনিনা কল্পিতাং হরিঃ ।
উবাচ ব্রহ্মবৃংদস্থং শনিং সদ্ভক্তবত্সলঃ ।। ১১ ।।

শ্রী নৃসিংহ উবাচ -

প্রসন্নোহং শনে তুভ্য়ং বরং বরয় শোভনম ।
য়ং বাংছসি তমেব ত্বং সর্বলোকহিতাবহম ।। ১২ ।।

শ্রী শনৈশ্চর উবাচ -

নৃসিংহ ত্বং ময়ি কৃপাং কুরু দেব দয়ানিধে ।
মদ্বাসরস্তবপ্রীতিকরঃ স্য়াদ্দেবতাপতে ।। ১৩ ।।

মত্কৃতং ত্বত্স্তবং য়ে বৈ শৃণ্বংতি চ পঠংতি চ ।
সর্বান কামান পূরয়েথাস্তেষাং ত্বং লোকভাবন ।। ১৪ ।।

শই নৃসিংহ উবাচ -

তথৈবাস্তু শনেঽহং বৈ রক্ষোভুবনমাস্থিতঃ ।
ভক্তকামান পূরয়িষ্য়ে ত্বং মমৈকং বচঃ শৃণুঃ ।। ১৫ ।।

www.yousigma.com

ত্বত্কৃতং মত্পরং স্তোত্রং য়ঃ পঠেচ্চ শৃণোতি য়ঃ ।
দ্বাদশাষ্টমজন্মস্থং তদ্ভয়ং মাস্তু তস্য় বৈ ।। ১৬ ।।

শনির্নরহরিং দেবং তথেতি প্রত্য়ুবাচ হ ।
ততঃ পরমসংতুষ্টাঃ জয়েতি মুনয়োঽবদন ।। ১৭ ।।

শ্রী নৃসিংহ উবাচ –

ইত্থং শনৈশ্চরস্য়াথ নৃসিংহদেবসংবাদমেতত স্তবনং চ মানবঃ ।
শ্রুণোতি য়ঃ শ্রাবয়তে চ ভক্ত্য়া সর্বান্য়ভীষ্টানি চ বিংদতে ধ্রুবম ।।
১৮ ।।

।। ইতি ভবিষ্য়োত্তরপুরাণে রক্ষোভুবনপ্রস্তাবে শনৈশ্চরকৃতা শ্রী
নৃসিংহকৃপাবলোকনপ্রার্থনাস্তুতিঃ ।।

www.yousigma.com